शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

'भ्रम धार्मिक विश्रब्धम्' इत्यादौ भ्रमणविधेः प्रकृतेऽनुपयुक्ततया निषेधपरत्वात् कथं न विपरीतलक्षणेति प्रतिपादनम्

'भ्रम धार्मिक! विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥'

ननु 'भ्रम धार्मिक' इत्यत्र भ्रम इत्यस्य मा भ्रम इत्यर्थे तात्पर्यात् भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्यवस्यतीति लक्षणा लक्षणायाश्च विपरीतलक्षणामूलकत्वात् अत्यन्ततिरस्कृतवाच्यध्वनिरस्तीति चेत्? न।

यत्र खलु विधिनिषेधावनुपपद्यमानावेव निषेधविधी पर्यवस्यतस्तत्रैव विपरीतलक्षणामूलकात्यन्ततिरस्कृतवाच्यध्वनेः अवसरः सम्भवः। यत्र पुनः प्रकरणादिपर्यालोचनेनैव विधिनिषेधयोः निषेधविधी अवगम्येते तत्राभिधाध्वनिरेव उक्तं च –

'क्वचिद् बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम्।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु॥'

अर्थात् कुत्रचित्स्थले = क्वचित्, बाध्यतया = विपरीतार्थपर्यवसानतया, ख्यातिः = अन्वयबोधो भवति। क्वचित् = कुत्रचित् स्थले च, ख्यातस्य = अन्वयबोधविषयीभूतस्य, बाधनम् = प्रकरणादिपर्यालोचनया विपरीतार्थे पर्यवसानं भवति। पूर्वत्र लक्षणामूलध्वनिरेव स्यात्। उत्तरत्र तु अभिधैव = अभिधामूलध्वनिरेव।

एवञ्च 'भ्रम धार्मिक' इत्यादौ प्रथमं भ्रमणविधिः शब्देनैव प्रतीयते पश्चादेव तस्याः कुलटावचनस्य प्रकरणादिना प्रतीतौ 'न भ्रम' इति भ्रमणनिषेधो व्यञ्जनयैव प्रतीयते। इत्यत्र भ्रमणविधेः प्रकरणादिपर्यालोचनानन्तरमेव भ्रमणनिषेधे पर्यवस्यतीति अभिधामूलवस्तुध्वनिरेवात्र न लक्षणामूलकोऽत्यन्ततिरस्कृतवाच्यध्वनिरिति दिक्।

---

उपेन्द्र झा
एसो० प्रो० साहित्य 23/04/20
रा० उ० हिं० महावि०
कुरुक्षेत्र, हरियाणा

तत्र भिन्नलिङ्गत्वे यथा-

बिभर्ति मृगशावाक्षी येदं भुवनभूषणम्

अत्र यच्छब्दः स्त्रीलिङ्गः इदं शब्दः नपुंसकलिङ्गः इति भिन्नलिङ्गत्वेन इदं शब्दः या इत्यस्यार्थं निर्वहतीति न दोषः।

भिन्नविभक्तिकत्वे यथा —

'इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः'।

अत्र यच्छब्दः प्रथमान्तः तत्कदाचित्त्वेऽपि तच्छब्दः तृतीयान्तः इति निराकाङ्क्षत्वप्रत्यायकतया न दोषाय।

क्वचिद् द्वयोरनुपादानेऽपि सामर्थ्याद् द्वयोरपि अवगमः।

यथा —

'न मे शमयति कोऽपि भारस्येत्युर्वि मा शुचः।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः॥'

अत्र यः नन्दस्य भवने अद्भुतपौरुषः बालः अस्ति स ते भारस्य शमयितेति बुध्यते। अत्र यत्तदो द्वयोरप्यार्थत्वम्।

ननु 'यद्-यद् विरहदुःखं मे तत्को वाऽपहरिष्यति' इत्यत्र पूर्ववाक्ये 'यद्-यद्' इति पदद्वयम्, उत्तरवाक्ये चैकं तच्छब्दमित्येकस्य यच्छब्दस्य साकाङ्क्षत्वमिति चेत्? न। तथाहि - अत्र 'यद्-यद्' इत्यनेन सामान्येन सर्वात्मकं विरहदुःखं विवक्षितम्, तथाभूतस्य तस्य तच्छब्देन परामर्शः।

इत्थं यत्र समानलिङ्गविभक्तिकत्वाभावे अन्यथाभावेन भिन्नौ यत्तच्छब्दौ तत्र तदादिशब्दानां प्रसिद्धपरामर्शित्वात् साकाङ्क्षतया दोषत्वम्।

यथोक्तोदाहरणेष्वपि दिक्।

---

उपेन्द्र झा
23/8/20
एसो० प्रो० साहित्य
रा०सं०सं० सदाशिव परिसर
पुरी

## शास्त्री तृतीय खण्डस्य कृते (साहित्य)

प्रश्न - यत्-तत् शब्दगतो अविमृष्टविधेयांश भावं सोदाहरणं विवेचनम्।

'आनन्दयति ते नेत्रे योऽसौ सुभ्रु समागतः।'
इत्यादिषु 'यच्छब्दनिर्दिष्टस्य तच्छब्देन परामर्शः' इति न्यायानुसारम्
यच्छब्दस्य निराकाङ्क्षत्व प्रतिपत्तये तच्छब्दस्यावश्यकत्वात्
प्रतिपाद्यमाना उपादेयत्वेन विधेयता नैव अविमृष्टा।
आनन्दयति - इत्युदाहरणे योऽसौ इत्यत्र तु यच्छब्दनिराकाङ्क्षतया
अनुवाद्यत्व प्रतीतिकृत् अतः अत्र 'अविमृष्टविधेयांश'
दोषः।

विदग्धशब्दस्यापि यच्छब्दनिराकाङ्क्षत्वस्य प्रसिद्धपरामर्शित्वार्थ-
त्वेन अविज्ञातार्थ बोधकत्वेन, न तु विशेषत्व बोधकत्वेन निराकाङ्क्ष-
त्वप्रतिपादकत्वम्। तदुक्तम् —

'प्रक्रान्तप्रसिद्धानुभूतार्थे च तत्पदम्।
यत्पदापेक्षया हीनं न विशेषणबोधकृत्॥'

यः स ते नयनानन्दकरः, सुभ्रु! स आगतः।
अत्र यच्छब्दसमभिव्याहृतत्वं स इत्यस्य प्रसिद्धार्थबोधकत्वम्।
यच्छब्द समभिव्याहृतत्वे तच्छब्दोपादानाभावात् यच्छब्दस्य निराका-
ङ्क्षत्वाभावात्। अतएव न दोषः। — यथा —
'आनन्दयति ते नेत्रे योऽधुनाऽसौ समागतः',
एकस्मिन्नेव तच्छब्दोपादानेऽपि। यत्र च यत्तदोरेकस्योपादानं
सम्भवति, तत्रैकस्योपादानेऽपि निराकाङ्क्षा प्रतीतिरिति
न दोषः। यथा हि यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने
सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्योपादानम्। यथा —
'आत्मा जानाति यत्पापम्',
एवम् - 'ये एवंविधाः परिकल्पयन्तः
सेवां कुर्वन्ति योऽस्माकं वेदवत्से।
मार्गन्ति रत्नानि महोदधेः
पुष्पदन्तौ कुतुकं धैर्यवीन्॥'

इत्यत्र उत्तरवाक्ये यच्छब्दस्योपादानात् तच्छब्दस्योपादानं
द्विविधं 'देवानां' इति पूर्ववाक्ये सः अपि इति तच्छब्दस्योपादानम्।
तत्र तच्छब्दस्य प्रक्रान्तार्थवाचित्वे यथा —

स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते
धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत्॥

अत्र 'स' इति तच्छब्दः प्रक्रान्तरामरूपार्थ-
वाचित्वात् यच्छब्दोपादानं नापेक्षते। एवञ्च प्रक्रान्तार्थकेन
तच्छब्देन 'सः सुग्रीवं न्यवेशयत्' इति यच्छब्दानपेक्षया बोध इति।

प्रसिद्धार्थत्वे यथा —
स वः शशिकलामौलिस्तादात्म्यायोपकल्पताम्।
अत्र सः इति तच्छब्दः प्रसिद्धार्थवाचित्वात् यच्छब्दोपादानम्
अनुपादानेऽपीति यच्छब्दं नापेक्षते।

अनुभूतार्थत्वे यथा —
'तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि।'
अत्र तामिति तच्छब्दस्य अनुभूतार्थवाचित्वात्
न यच्छब्दापेक्षते। एवमेव लिङ्ग विभक्तिरेव एव यच्छब्दसहित-
स्थिताः सर्वादिशब्दाः प्रसिद्धपरामर्शकत्वेन योग्यतापन्नाः
विभिन्न लिङ्गविभक्तिकानां तु निराकाङ्क्षतायामपि निराकाङ्क्षत्व
प्रतिपादकत्वाभावः दोषत्वम्। P.T.O

## शास्त्री प्रथम् खण्डस्य कृते (साहित्यम्)

मम्मटोक्त काव्य लक्षणे सगुण पदस्य
विश्वनाथ द्वारा प्रतिपादनम्।

"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि"।

इत्थं अदोष पदस्य विवेचनम् कृत्वा ग्रन्थकारेण सगुण पदस्य विवेचनम् क्रियते। अत्र शब्दार्थयोः 'सगुणौ' इति विशेषणमनुपपन्नम्। माधुर्यादि गुणानाम् एकैकधर्मत्वात्। ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः इत्यादिना काव्यप्रकाशे स्वयमाचार्य मम्मटेन प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेनोपचारतः (लक्षणया रसाभिव्यञ्जकत्वरूप परम्परा सम्बन्धेन) सगुणौ शब्दार्थौ इति शब्दार्थयोः सगुणत्व विशेषणम् उपपद्यते चेत्। तदपि न युक्तम्। तथाहि - तयोः काव्य स्वरूपाभिमतयोः शब्दार्थयोः रसोऽस्ति न वा। नास्ति चेत् गुणवत्त्वमपि नास्ति। गुणानां तदन्वय व्यतिरेकानुविधायित्वात्। अस्ति चेत्? कथं नोक्तम् रसवन्ताविति विशेषणम्। गुणवत्त्वान्यथाऽनुपपत्त्या एतल्लभ्यते इति चेत्, रसवन्तावित्येव वक्तुं युक्तं न सगुणाविति। नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनापि उच्यते।

ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविति अभिप्राय इति चेत्। तन्न। गुणाभिव्यञ्जक शब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वात्। न स्वरूपाधायकत्वम्। उक्तञ्च काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्व खञ्जत्वादयः इव रीतयोऽवयव संस्थान विशेषवत्, अलंकाराः कटक कुण्डलादिवत्। ~~इति~~ इत्थमाचार्य विश्वनाथेन मम्मटाचार्यस्य काव्य लक्षणे प्रयुक्त सगुण पदस्य विवेचनं कृतम्।

इति दिक्।

उपेन्द्र झा
23/8/20
सहा० प्रा० साहित्य
रा० उ० सं० महावि०
[illegible], [illegible]